# Brahmaprakashakhyabrahmachariproktam Balakrishna Stotram

# બ્રહ્મપ્રકાશાખ્યબ્રહ્મચારિપ્રોક્તં બાલકૃષ્ણસ્તોત્રમ્

## Document Information


Text title : Brahmaprakashakhyabrahmachariproktam Balakrishna Stotram

File name : brahmaprakAshAkhyabrahmachAriproktaMbAlakRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 61/83-111||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# બ્રહ્મપ્રકાશાખ્યબ્રહ્મચારિપ્રોક્તં બાલકૃષ્ણસ્તોત્રમ્

ઇત્યુક્તો બ્રાહ્મણઃ પ્રાહ ગુરોર્યોગાદહં તવ ।
પ્રજ્વાલ્ય સર્વપાપાનિ કરિષ્યે મોક્ષણં ધ્રુવમ્ ॥ ૮૩॥

યદિ શુશ્રૂષિતો વહ્નિર્ગુરોઃ શુશ્રૂષણાદનુ ।
વ્રતાનિ વા સુચીર્ણાનિ મોક્ષો ભવતુ રક્ષસઃ ॥ ૮૪॥

યદ્યહં પિતરં દેવં ગુરું ચ માતરં હરિમ્ ।
ગૌરવેણાઽભિવન્દામિ મોક્ષો ભવતુ રક્ષસઃ ॥ ૮૫॥

યદ્યહં મનસા વાચા કર્મણા ચ ગુરું હરિમ્ ।
નાઽવમાને યોજયામિ મોક્ષો ભવતુ રક્ષસઃ ॥ ૮૬॥

જપ રાક્ષસ દેવેશં શ્રીકૃષ્ણં પુરુષોત્તમમ્ ।
હરિકૃષ્ણં હૃષીકેશં વાસુદેવં જનાર્દનમ્ ॥ ૮૭॥

પ્રણતોઽસ્મિ જગન્નાથં સ ચ મોક્ષં દધાતુ મે ।
ચરાચરગુરું નાથં કૃષ્ણનારાયણં પ્રભુમ્ ॥ ૮૮॥

શઙ્ખિનં ચક્રિણં શાર્ઙ્ગધારિણં ધ્વજિનં હરિમ્ ।
પ્રણતોઽસ્મિ પતિં લક્ષ્મ્યાઃ સ ચ મોક્ષં દધાતુ મે ॥ ૮૯॥

દામોદરં પુણ્ડરીકનેત્રં ચ શેષશાયિનમ્ ।
પ્રણતોઽસ્મિ ચ ગોવિન્દં સ ચ મોક્ષં દધાતુ મે ॥ ૯૦॥

નારાયણં નરં પૃથ્વીધરં ધામાધિવાસિનમ્ ।
પ્રણતોઽસ્મિ પ્રભાનાથં સ ચ મોક્ષં દધાતુ મે ॥ ૯૧॥

શ્રીવત્સવક્ષસં શ્રીશં શ્રીમત્પારવતીપતિમ્ ।
પ્રણતોઽસ્મિ રમાકાન્તં સ ચ મોક્ષં દધાતુ મે ॥ ૯૨॥

યતયો યં ચિન્તયન્તિ રાધા રઞ્જયતિ પ્રભુમ્ ।
સમસ્તાલમ્બનમૂર્તિં તમસ્મિ શરણં ગતઃ ॥ ૯૩॥

પરબ્રહ્માઽસઙ્ખ્યગોપીપતિં શ્રીકમ્ભરાસુતમ્ ।
સર્વાધારં સર્વગં ચ તમસ્મિ શરણં ગતઃ ॥ ૯૪॥

પરમાત્માનમાત્મસ્થં કર્મક્ષાલનશક્તિકમ્ ।
પુનર્ભવપ્રભેત્તારં તમસ્મિ શરણં ગતઃ ॥ ૯૫॥

ઈશાન્ દેવાનૃષીન્ પિતૄન્ માનવાઁશ્ચ સરીસૃપાન્ ।
પાદપાન્ જલજાન્ સ્વેદોદ્ભવાન્ સૃજતિ રક્ષતિ ॥ ૯૬॥

બ્રહ્મરૂપધરં જગદ્યોનિં ત્રાતારમચ્યુતમ્ ।
ગોપાલકૃષ્ણબાલં ચ તમસ્મિ શરણં ગતઃ ॥ ૯૭॥

યજ્ઞેશ ચાન્તકં સર્વાન્તર્યામિણં પરેશ્વરમ્ ।
યસ્માન્નાન્યત્પરં કિઞ્ચિત્ તમસ્મિ શરણં ગતઃ ॥ ૯૮॥

શુભાઽશુભાનિ કાર્યાણિ જન્માન્તરકૃતાનિ મે ।
અનાદિશ્રીકૃષ્ણનારાયણસ્તાનિ વ્યપોહતુ ॥ ૯૯॥

યન્નિશાયાં ચ યત્પ્રાતર્યન્મધ્યાહ્નાઽપરાહ્ણયોઃ ।
સન્ધ્યયોશ્ચ કૃતં પાપં તન્મે સર્વં પ્રણશ્યતુ ॥ ૧૦૦॥

યત્તિષ્ઠતા યદ્વ્રજતા યચ્ચ શય્યાગતેન વૈ ।
કૃતં દુઃખકરં કર્મ કાયેન મનસા ગિરા ॥ ૧૦૧॥

અજ્ઞાનતો જ્ઞાનતો વા મદાચ્ચલિતચેતસા ।
તત્ક્ષિપ્રં વિલયં યાતુ બાલકૃષ્ણસ્ય કીર્તનાત્ ॥ ૧૦૨॥

પરદારપરદ્રવ્યવાઞ્છાદ્રોહોદ્ભવં ચ યત્ ।
મહાત્મનાં પ્રનિન્દાં ચ કુર્વતા પરદુઃખદામ્ ॥ ૧૦૩॥

કૃતં પાપં મર્મભેદિવચસા તત્પ્રણશ્યતુ ।
યચ્ચ ભોજ્યે તથા પેયે ભક્ષ્યે ચોષ્યે વિલેહને ॥ ૧૦૪॥

યદ્બાલ્યે યચ્ચ કૌમાર્યે યત્પાપં યૌવને મમ ।
વયઃપરિણતૌ યચ્ચ યચ્ચ જન્માન્તરે કૃતમ્ ॥ ૧૦૫॥

તદનાદિકૃષ્ણનારાયણેતિ જપકીર્તનાત્ ।
પ્રયાતુ વિલયં સદ્યો મોક્ષદસ્ય પ્રભાવનાત્ ॥ ૧૦૬॥

અનાદિશ્રીકૃષ્ણનારાયણાય હરયે નમઃ ।
કમ્ભરાશ્રીનન્દનાય બાલકૃષ્ણાય તે નમઃ ॥ ૧૦૭॥

શ્રીમદ્ગોપાલકૃષ્ણસ્ય બાલકાય નમો નમઃ ।
એતદ્ભદ્ર મયાऽऽખ્યાતં તવ પાતકનાશનમ્ ॥ ૧૦૮॥

સ્વર્ગદં મોક્ષદં દિવ્યં સ્તોત્રં યદ્ગુરુણોદિતમ્ ।
અનેન બાલકૃષ્ણં ત્વં સમારાધય રાક્ષસ! ॥ ૧૦૯॥

પ્રત્યહં ત્વં સ્તવેનાऽનેનાऽપિ સ્મૃત્વા ચ લોમશમ્ ।
ગુરું તથા પરબ્રહ્મ શ્રીકૃષ્ણપુરુષોત્તમમ્ ॥ ૧૧૦॥

સ્તુત્વા ભક્તિં દૃઢાં કૃત્વા તતઃ પાપાત્ પ્રમોક્ષ્યસે ।
સ્તુતો ભક્ત્યા ભક્તવશઃ સર્વપાપહરો હરિઃ ॥ ૧૧૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૧-અધ્યાયાન્તર્ગતં
બ્રહ્મપ્રકાશાખ્યબ્રહ્મચારિપ્રોક્તં બાલકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૧/૮૩-૧૧૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 61/83-111..

Proofread by PSA Easwaran

---

*Brahmaprakashakhyabrahmachariproktam Balakrishna Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*